# 2022

MURALIDHAR GIRLS' COLLEGE
LIBRARY

## SANSKRIT — GENERAL

**Paper : GE/CC-3**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

### Unit - I

**(Marks : 25)**

1\. (a) (i) नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरुणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्तः इवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा
स्तोयाघारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किताः॥

(ii) गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायावद्धकदम्बकं मृगकूलं रोमन्थमभ्यस्यतु।
विश्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्यावन्धमस्मद्धनुः॥

—उपरिलिखितयोरे***कस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(b) अधोलिखितेषु ***द्वयोः*** टीका संस्कृतभाषया देवनागरीलिपिमाश्रित्य लेखनीया। 5×2

सूत्रधारः, विदूषकः, प्रस्तावना, दुर्वासा।

(c) प्रसङ्गनिर्देशपूर्वकं ***कस्यैकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या। 6×1

(i) आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

(ii) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
घ्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

MURALIDHAR GIRLS' COLLEGE
LIBRARY



(d) (i) विग्रहवाक्यमुल्लिख्य ***कस्यैकस्य*** समासनाम लेखनीयम् (संस्कृतभाषया देवनागरीलिप्या च)। 2×1
प्रयोगविज्ञानम् 1.(c)(i) प्रश्ने, नीलोत्पलपत्रधारया 1.(c)(ii) प्रश्ने

(ii) निम्नलिखितयोः ***कस्यैकस्य*** सन्धिविच्छेदः करणीयः (संस्कृतभाषया देवनागरीलिप्या च)। 1×1
इवोपलाः 1.(a)(i) प्रश्ने, शृङ्गैर्मुहुस्ताडितम् 1.(a)(ii) प्रश्ने

(iii) निम्नलिखितयोः ***कस्यैकस्य*** व्युत्पत्तिनिर्णयं कुरु (संस्कृतभाषया देवनागरीलिप्या च)। 1×1
मन्ये 1.(c)(i) प्रश्ने, व्यवस्यति 1.(c)(ii) प्रश्ने।

**Section – B**

**Unit I**

**(Marks : 15)**

**2.** (a) अभिज्ञानशकुन्तलनाटकस्य कस्मिन् अङ्के दुष्यन्त-सर्वदमनयोः साक्षात्कारः अभवत्? कथं दुष्यन्तः क्रमेण तस्य पुत्रस्य परिचयं ज्ञातवान्? 2+8

***अथवा,***

सानुमती का? कस्मिन् अङ्के तस्याः आविर्भावः? कालिदासेन अस्य वृत्तान्तस्य अवतरणं किमर्थं कृतम्? 2+1+7

(b) अधोलिखितयो***रेकस्य*** मातृभाषया अनुवादः कर्तव्यः। 5×1

(i) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमवोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

(ii) सा निन्दन्ती स्वानि भाग्यानि वाला
वाहूत्क्षेपं क्रन्दितुञ्च प्रवृत्ता।
स्त्रीसंस्थानं चाप्सरस्तीर्थमारा–
दुत्क्षिप्यैनां ज्योतिरेकं जगाम॥

**Section – C**

**Unit - II**

**(Marks : 10)**

**3.** अधोलिखितेषु कस्यापि ***द्वयस्य*** टीका संस्कृतभाषया देवनागरीलिपिमाश्रित्य लेखनीया। 5×2
जनान्तिकः, आकाशभाषितम्, स्वगतः, अपवारितः।

MURALIDHAR GIRLS' COLLEGE
LIBRARY

## Section – D

### Unit - II

### (Marks : 15)

4. अधोलिखितेषु कस्यापि ***द्वयस्य*** टीका लेखनीया। 5×2

शूद्रकः, भासः, मृच्छकटिकम्, उत्तररामचरितम्।

5. अधोलिखितानां ***पञ्चानां*** प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 1×5

(a) मालतीमाधवनाटकस्य नायिका का?

(b) विक्रमोर्वशीयमिति कीदृशं रूपकम्?

(c) रत्नावलीनाट्यकृतौ कति अङ्काः?

(d) अभिज्ञानशकुन्तलनाटकस्य प्रधानरसः कः?

(e) रामायणमाश्रित्य भासविरचितस्य कस्यचिदेकस्य नाटकस्य नाम लिख्यताम्।

(f) कर्पूरमञ्जरी केन विरचिता?

(g) अभिज्ञानशकुन्तलनाटकस्य विदूषकस्य नाम किम्?